# gAyatrIkavacham 3

# ગાયત્રીકવચમ્ ૩

## Document Information

Text title : gAyatrIkavacham 3

File name : gAyatrIkavacham3.itx

Category : kavacha, devii, gAyatrI, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : September 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2020

*sanskritdocuments.org*

# ગાયત્રીકવચમ્ ૩

શ્રીગણેશાય નમઃ ॥

શ્રીપાર્વત્યુવાચ ।
દેવદેવ મહાદેવ સંસારાર્ણવતારકમ્ ।
ગાયત્રીકવચં દેવ કૃપયા કથય પ્રભો ॥ ૧॥

શ્રીમહાદેવ ઉવાચ ।
મૂલાધારે સ્થિતા નિત્યં કુણ્ડલી તત્ત્વરૂપિણી ।
સૂક્ષ્માતિસૂક્ષ્મપરમા બિસતન્તુસ્વરૂપિણી ॥ ૨॥

વિદ્યુત્પુઞ્જપ્રતીકાશા કુણ્ડલી શ્રુતિસર્પિણી ।
પરસ્ય બ્રહ્મગ્રહણી પઞ્ચાશદ્વર્ણરૂપિણી ॥ ૩॥

શિવસ્ય નર્તકી નિત્યા પરબ્રહ્મપ્રપૂજિતા ।
બ્રાહ્મણસ્યૈવ ગાયત્રી ચિદાનન્દસ્વરૂપિણી ॥ ૪॥

બ્રહ્મણ્યવર્ત્મવાતેયં પ્રાણાત્મા નિત્યનૂતનાત્ ।
નિત્યં તિષ્ઠતિ સાનન્દા કુણ્ડલી તવ વિગ્રહે ॥ ૫॥

અતિગોપ્યં મહત્પુણ્યં ત્રિકોટીતીર્થસંયુતમ્ ।
સર્વજ્ઞાનમયી દેવી સર્વદાનમયી સદા ॥ ૬॥

સર્વસિદ્ધિમયી દેવી પાર્વતી પ્રાણવલ્લભા ।
ૐ ૐ ૐ ૐ ભૂઃ ૐ ૐ ભુવઃ ૐ ૐ સ્વઃ ૐ ૐ ત ૐ ૐ ત્સ
ૐ ૐ વિ ૐ ૐ તુ ૐ ૐ વ ૐ ૐ રે ૐ ૐ ણ્યં ૐ ૐ ભ
ૐ ૐ ર્ગો ૐ ૐ દે ૐ ૐ વ ૐ ૐ સ્ય ૐ ૐ ધી ૐ ૐ મ
ૐ ૐ હિ ૐ ૐ ધિ ૐ ૐ યો ૐ ૐ યો ૐ ૐ નઃ ૐ ૐ પ્ર
ૐ ૐ ચો ૐ ૐ દ ૐ ૐ યાત્ ૐ Oમ્ । ૐ ભૂઃ ૐ

પાતુ મે મૂલં ચતુર્દલસમન્વિતમ્ ।
ૐ ભુવઃ ૐ પાતુ મે લિઙ્ગં સજલં ષડ્દલાત્મકમ્ ॥ ૭॥

ઓં સ્વઃ ૐ પાતુ મે કણ્ઠં સકાશાં દલષોડશમ્ ।
ૐ  ત ૐ  પાતુ મે રૂપં બ્રહ્માણં કારણં પરમ્ ॥ ૮॥

ૐ ત્સ ૐ પાતુ મે બ્રહ્માણં પાતુ સદા મમ ।
ૐ વિ ૐ પાતુ મે ગન્ધં સદા શિશિરસંયુતમ્ ॥ ૯॥

ૐ તુ ૐ પાતુ મે સ્પર્શં શરીરસ્ય ચ કારણમ્ ।
ૐ ર્વ ૐ પાતુ મે શબ્દં શબ્દવિગ્રહકારણમ્ ॥ ૧૦॥

ૐ રે ૐ પાતુ મે નિત્યં સદા તત્ત્વશરીરકમ્ ।
ૐ ણ્યં ૐ પાતુ મે હ્યક્ષં સર્વતત્ત્વૈકકારણમ્ ॥ ૧૧॥

ઓં ભ ૐ પાતુ મે શ્રોત્રં શ્રવણસ્ય ચ કારણમ્ ।
ૐ ર્ગો ૐ પાતુ મે ઘ્રાણં ગન્ધોપાદાનકારણમ્ ॥ ૧૨॥

ૐ દે ૐ પાતુ મે વાસ્યં સભાયાં શબ્દરૂપિણી ।
ૐ વ ૐ પાતુ મે બાહુયુગલં બ્રહ્મકારણમ્ ॥ ૧૩॥

ૐ સ્ય ૐ પાતુ મે લિઙ્ગં ષડ્દલં ષડ્દલૈર્યુરતમ્ ।
ૐ ધી ૐ પાતુ મે નિત્યં પ્રકૃતિં શબ્દકારણમ્ ॥ ૧૪॥

ૐ મ ઓં પાતુ મે નિત્યં મનોબ્રહ્મસ્વરૂપિણમ્ ।
ૐ હિ ૐ પાતુ મે બુદ્ધિં પરબ્રહ્મમયં સદા ॥ ૧૫॥

ૐ ધિય ૐ પાતુ મે નિત્યમહઙ્કારં યથા તથા ।
ૐ યો ૐ પાતુ મે નિત્યં જલં સર્વત્ર સર્વદા ।
ૐ નઃ ૐ પાતુ મે નિત્યં તેજઃપુઞ્જો યથા તથા ॥ ૧૬॥

ૐ પ્ર ૐ પાતુ મે નિત્યમનિલં કાર્યકારણમ્ ।
ૐ ચો ૐ પાતુ મે નિત્યમાકાશં શિવસન્નિભમ્ ॥ ૧૭॥

ૐ દ ૐ પાતુ મે જિહ્વાં જપયજ્ઞસ્ય કારણમ્ ।
ૐ યાત્ ૐ મે નિત્યં શિવજ્ઞાનમયં સદા ॥ ૧૮॥

તત્ત્વાનિ પાતુ મે નિત્યં ગાયત્રી પરદૈવતમ્ ।
કૃષ્ણા મે સતતં પાતુ બ્રહ્માણી ભૂર્ભુવઃસ્વરોમ્ ॥ ૧૯॥

ૐ અસ્ય શ્રીગાયત્રીકવચસ્ય પરબ્રહ્મ ઋષિઃ
ઋગ્યજુઃસામાથર્વાણશ્છન્દાંસિ, બ્રહ્મા દેવતા,

ધર્માર્થકામમોક્ષાર્થં જપે વિનિયોગઃ ॥

ૐ ભૂર્ભુવઃસ્વઃ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ ।
કામક્રોધાદિકં સર્વં સ્મરણાદ્યાતિ દૂરતઃ ।
ઇદં કવચમજ્ઞાત્વા બ્રહ્મવિદ્યાં જપેદ્યદિ ॥ ૨૦॥

શતકોટિજપેનાપિ ન સિદ્ધિર્જાયતે પ્રિયે ।
ગાયત્રીકવચાત્સર્વં સ્મરણાત્સિધ્યતિ ધ્રુવમ્ ॥ ૨૧॥

પઠિત્વા કવચં વિપ્રો ગાયત્રીં સકૃદુચ્ચરેત્ ।
સર્વપાપવિનિર્મુક્તો જીવન્મુક્તો ભવેદ્દ્વિજઃ ॥ ૨૨॥

ઇદં કવચમજ્ઞાત્વા ત્વન્યદ્યઃ કવચં પઠેત્ ।
સર્વં તસ્ય વૃથા દેવિ ત્રૈલોક્યમઙ્ગલાદિકમ્ ॥ ૨૩॥

ગાયત્રી કવચં યસ્ય જિહ્વાયાં વિદ્યતે સદા ।
તદાઽમૃતમયી જિહ્વા પવિત્રા જપપૂજને ॥ ૨૪॥

ઇદં કવચમજ્ઞાત્વા બ્રહ્મવિદ્યાં જપેદ્યદિ ।
વ્યર્થં ભવતિ ચાર્વઙ્ગિ તજ્જપો વનરોદનમ્ ॥ ૨૫॥

બ્રહ્મહત્યા સુરાપાનં સ્તેયં ગુર્વઙ્ગનાગમઃ ।
મહાન્તિ પાતકાન્યસ્ય સ્મરણાદ્યાન્તિ દૂરતઃ ॥ ૨૬॥

નશ્વરં માંસમેદોઽસ્થિમજ્જાશુક્રવિનિર્મિતમ્ ॥ ૨૭॥

વાતપિત્તકફૈર્યુક્તં સ્થૂલદેહં તદુચ્યતે ।
સૂક્ષ્મં જ્યોતિર્મયં દેહં પઞ્ચભૂતાત્મકં વિદુઃ ॥ ૨૮॥

મહાપદ્મવનાન્તસ્થં સર્વાવયવસંયુતમ્ ।
આધારદેહસમ્બન્ધાદ્ગાયત્રી બ્રહ્મણઃ સ્વયમ્ ॥ ૨૯॥

એતદેવ પરં બ્રહ્મ કથિતે ઉભયાત્મકે ।
બ્રાહ્મણસ્યૈવ જીવાત્મા ગાયત્રીસહિતો વપુઃ ॥ ૩૦॥

આત્મનાં હૃદયામ્ભોજે પ્રદીપકલિકોપમમ્ ।
નિર્ધૂમં ચ યથા જ્યોતિસ્તૈલાગ્નિવર્તિયોગતઃ ॥ ૩૧॥

તજ્જ્યોતિઃ પરમં બ્રહ્મ શુભદં નાત્ર સંશયઃ ।
ગાયત્રીકવચં ન્યાસં માતૃકાસ્થાનસન્ધિષુ ॥ ૩૨॥

સ કૃત્વા બ્રાહ્મણશ્રેષ્ઠ ચાન્યન્યાસં સમાચરેત્ ।
અન્યન્યાસે તથા સિદ્ધિરન્યથાયાઽરણ્યરોદનમ્ ॥ ૩૩॥

ગાયત્રીન્યાસમાત્રેણ પરબ્રહ્મમયો દ્વિજઃ ।
ઇદં કવચમજ્ઞાત્વા બ્રહ્મચર્યં કરોતિ યઃ ॥ ૩૪॥

બ્રહ્મચર્યં ભવેદ્વ્યર્થં ગાયત્રીકવચં વિના ।
કવચસ્ય પ્રસાદેન બ્રાહ્મણો જ્વલદગ્નિવત્ ॥ ૩૫॥

કવચં પરમેશાનિ સૃષ્ટિસ્થિતિલયાત્મકમ્ ।
કવચં બ્રાહ્મણ ઇદં પ્રાતરુત્થાય યઃ પઠેત્ ॥ ૩૬॥

ગાયત્રીં સ સકૃત્સ્મૃત્વા જપલક્ષફલં ભવેત્ ।
ગાયત્રીં દશધા જપ્ત્વા દશલક્ષફલં ભવેત્ ॥ ૩૭॥

એવં ક્રમેણ ગાયત્રીં શતધા પ્રજપેદ્યદિ ।
શતલક્ષફલં પ્રાપ્ય વિહરેદ્દેવવદ્ભુવિ ॥ ૩૮
સૂર્યેન્દોર્ગ્રહણે ચેદં પઠિત્વા કવચં દ્વિજઃ ।
સકૃદ્યદિ જપેદ્વિદ્યાં ગાયત્રીં પરમાક્ષરામ્ ॥ ૩૯॥

તત્ક્ષણાત્તુ ભવેત્સિદ્ધો બ્રહ્મસાયુજ્યમાપ્નુયાત્ ।
ઇદં કવક્ષમજ્ઞાત્વા ગાયત્રીં પ્રજપેત્તુ યઃ ॥ ૪૦॥

જપ એવ વૃથા તસ્ય નિસ્તેજો ન ચ સિદ્ધિદઃ ।
યઃ પઠેત્કવચં દેવિ સતતં શિવસન્નિધૌ ॥ ૪૧॥

વિષ્ણુદેવસ્ય કવચં પ્રજપેચ્છક્તિસન્નિધૌ ।
તેજઃપુઞ્જમયો વિપ્રસ્તત્ક્ષણાજ્જાયતે ધ્રુવમ્ ॥ ૪૨॥

ઇતિ શ્રીરુદ્રયામલે પાર્વતીશ્વરસંવાદે ગાયત્રીકવચં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*gAyatrIkavacham 3*

pdf was typeset on September 14, 2020

Please send corrections to *sanskrit@cheerful.com*